# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१) (New)** | **प्रश्नपत्रम् – 4 (2)** | गुणाः –70 |
| विषयः – साहित्यम् (ध्वनिवर्गः) | **कोड –C.C.4.1.3 (2)** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – ध्वन्यालोकः द्वितीयोद्योतः | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत ।** ५

१ असंलक्ष्यक्रमोद्द्योतः क्रमेण द्योतितः परः ।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ॥

२ प्रधानेऽत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥

प्रश्न २ अविवक्षिवाच्यस्य ध्वनेः भेदद्वयं सोदाहरणं विवेचयत । १०

अथवा

रसादीनां कथं प्रतीतिरितिविषये भट्टलोल्लटादीनां मतानि खण्डयत ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत ।** ५

१ शृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥

२ समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः ।** १०

१ ध्वनिकारमतेन गुणालङ्कारयोः लक्षणमुक्त्वा तेषां पृथक्विषयत्वं प्रतिपाद्यताम् ।

२ काव्ये ओजो गुणस्य कुत्र स्थितिरिति ध्वनिकारमतम् उपस्थाप्यताम् ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्याप्येकस्य ससन्दर्भ व्याख्या कार्या ।** ५

१ शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धनात् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥

२ ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलङ्कारवर्ग एति यथार्थताम् ॥

**प्रश्न ६** रसध्वन्यालोके काव्ये अलङ्काराणां हेयोपादेयता कथं ज्ञायत इति ध्वनिकारमतं विवेचयत । १०

अथवा

व्यङ्ग्यार्थस्य स्वशब्देन वाच्ये इति कथं न ध्वनिः इति प्रतिपाद्यताम् ।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्याप्येकस्य कारिकायाः ससन्दर्भं व्याख्या कार्या ।** ५

१ अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः सम्प्रकाशते ।
यस्तात्पर्येणवस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः ॥

२ यत्र प्रतीयमानोऽर्थः प्रक्लिष्टत्वेन भासते ।
वाच्यस्याङ्गतया वाऽपि नास्यसौ गोचरो ध्वनेः ॥

**प्रश्न ८ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत ।** १०

१ अर्थशक्त्युत्थध्वने: भेदत्रयं सोदाहरणं प्रदर्शयत ।

२ व्यतिरेकालङ्कारध्वनेः द्वैविध्यं सोदाहरणं प्रतिपादयत ।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत ।** १०

१ रसादिरलङ्कारः कतिविधः ?

२ चारुत्वहेतवे के प्रसिद्धा ?

३ द्वितीयोद्योतस्य वर्ण्यविषयः कः ?

४ दोषस्य किं लक्षणम् ?

५ संकरः कतिविधः ?

६ अनित्यदोषानां किम् ?

७ कः परः प्रह्लादो रसः ?

८ आनन्दवर्धनेन कति गुणाः स्वीकृताः ?

९ भट्टशंकुकस्य कः वादः ?

१० कमाश्रित्य माधुर्यं प्रतितिष्ठति ?

११ कुत्र श्लेषः भवति ?

१२ ओजो गुणः कीदृशेन वाक्येन व्यनक्ति ?

१३ चाटुकारः परिहासवाक्येन कं प्रसादयति ?

१४ अर्थशक्त्युद्भवध्वनेः कति भेदाः ?

१५ गुणीभूतव्यङ्ग्यकाव्यं कदा भवति ?